30-08-2020

अनिवार्यपत्रम् । शास्त्री II

व्याकरणछात्रेभ्यः रघुवंशम् । श्लोकव्याख्या ।

"सा चूर्णगौरं रघुनन्दनस्य धात्रीकराभ्यां करभोपमोरुः ।
आसञ्जयामास यथाप्रदेशं कण्ठे गुणं मूर्तमिवानुरागम् ॥"

**सन्दर्भः** → प्रस्तुतोऽयं श्लोकः महाकविकालिदासविरचितस्य रघुवंशमहाकाव्यस्य षष्ठसर्गादिन्दुमतीस्वयम्वरवर्णनप्रसङ्गात् - उद्धृतोऽस्ति ।

**प्रसङ्गः** → कविरत्राजस्य कण्ठे इन्दुमत्या माल्यार्पणं सविशेषं वर्णयति ।

**अन्वयः** → करभोपमोरुः सा चूर्णगौरं गुणं मूर्तम् अनुरागम् इव धात्रीकराभ्यां रघुनन्दनस्य कण्ठे यथाप्रदेशम् आसञ्जयामास ।

**शब्दार्थः व्याकरणञ्च** → करभोपमोरुः → करभ उपमा ययोः तौ ऊरूः यस्याः सा = करप्रदेशोपमजघना, हस्तिशुण्डोपमजघना वा । चूर्णगौरं = चूर्णलोहितं । गुणं = स्रजम् । मूर्तम् = मूर्तिमन्तम् । अनुरागम् = स्नेहम् इव = यथा । धात्रीकराभ्याम् → धात्र्याः करौ, ताभ्याम् = सुनन्दा-हस्ताभ्याम् । रघुनन्दनस्य → रघोः नन्दनः तस्य, रघुं नन्दयति यः सः तस्य = अजस्य । कण्ठे = गले । यथाप्रदेशं = यथास्थानं । आसञ्जयामास = परिधापयामास ।

**तात्पर्यः** → अजकुमारं विलोक्य प्रसन्नचितेन्दुमती तस्य कण्ठे स्वमूर्तमनुरागमि सुनन्दाकराभ्यामादाय स्रजं समर्पयामास ।

**विशेषः** → अस्मिन् श्लोके शृङ्गाररसः वैदर्भीरीतिः प्रसादगुणः उत्प्रेक्षालङ्कारः उपजातिछन्दश्च ।

(signature)

डॉ० निर्मलकुमार झा, (सं० प्राचार्यः
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

30-08-2020

संस्कृतसामान्यम् । उपशास्त्री II

अनिवार्यपत्रम् । संस्कृतनिबन्धम् ।

## अस्माकं / मम प्रियकविः ।

इह संसारे अनेकाः देशाः भाषाश्च सन्ति । तत्र भारतवर्षस्य राष्ट्रभाषा हिन्दीति संस्कृतभाषातः उत्पन्नाः अस्ति । हिन्दीं भारतवर्षस्य अधिकांशाः जनाः वदन्ति । हिन्दीभाषायाम् अनेकाः कवयः अभवन् । सम्प्रति अनेकाः कवयन्त्यपि । तेषु कविषु मध्ये रामचरितमानसस्य प्रणेता कविः तुलसीदासः मम प्रिय कविः । इदं पुस्तकं भारतवर्षस्य भारतीयानाञ्च कण्ठाभरणमस्ति । अनेन पुस्तकेन कविशिरोमणिः तुलसीदासः भारतीयसंस्कृतेः संरक्षणं चकार । अस्मिन् पुस्तके रामादिचतुर्णां भ्रातॄणामुदात्तं चरित्रं उल्लिखितम् अस्ति । रामस्य पत्नी सीता नारीणां कृते आदर्शभूताद्यापि अस्ति । नानापुराणनिगमागमसम्मतं स्वकीयं विचारं च तुलसीदासेन अस्मिन् पुस्तके भाषाबद्धं कृतम् । तेन समन्वयवादिं साहित्यं सरलहिन्दी भाषायां लिखितम् । इदं महाकाव्यम् - अल्पज्ञानं बहुज्ञानं च कृते अनुशीलनीयमस्ति । रामरावणयोर्मध्ये युद्धं जीवनसंघर्षस्य प्रतीकमस्ति । इदं काव्यं ज्ञानभक्त्योः संगमनमस्ति । अत्र छात्रस्य गुरुं प्रति, पुत्रस्य पितरं प्रति, पत्युः पत्नीं प्रति, पत्न्याः पतिं प्रति, भ्रातुः भ्रातरं प्रति, राज्ञः प्रजां प्रति कर्तव्यानि वर्णितानि । अयं हि महाग्रन्थः लोकोपकारः कलिकल्मषहन्ता चास्ति अतएव महाकवि-तुलसीदासकृत-रामचरितमानसः मह्यमतीव रोचते अतः मम प्रिय-कविः तुलसीदासः अस्ति ।

(signature) 30-08-2020

डॉ० निर्मलकुमार झा, (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

संस्कृतसामान्यम्। उपशास्त्री I 30-08-2020

अनिवार्यपत्रम्

संस्कृतानुवादः।

1. संस्कृतभाषा के श्रेष्ठ कवि कालिदास हैं → संस्कृतभाषायाः श्रेष्ठः कविः कालिदासः अस्ति।
2. वे अन्य सभी कवियों में श्रेष्ठ हैं → सः अन्यानाम् (अन्येषु) समस्तानां (समस्तेषु) कवीनां (कविषु) श्रेष्ठः अस्ति।
3. कालिदास ने रघुवंश महाकाव्य की रचना की → कालिदासः रघुवंशमहाकाव्यस्य रचनामकरोत्। कालिदासेन रघुवंशमहाकाव्यः रचितः।
4. रघुवंश में रघुवंशीय राजाओं का चरित्र वर्णित है → रघुवंशे रघुवंशीयराज्ञां चरित्रं वर्णितमस्ति।
5. इस काव्य में रघु का चरित अति शोभन है → अस्मिन् काव्ये रघोः चरित्रमतिशोभनमस्ति।
6. कालिदासरचित मेघदूत एक खण्डकाव्य है → कालिदासेन रचितं मेघदूतमेकं खण्डकाव्यमस्ति।
7. यह काव्य सुकोमल तथा ललितकल्पनायुक्त है → इदं काव्यं सुकोमलं ललितकल्पनायुक्तं चास्ति।
8. कवि की सर्वाधिक उत्कृष्ट रचना अभिज्ञानशाकुन्तलम् है → कवेः सर्वाधिका उत्कृष्टा रचना अभिज्ञानशाकुन्तलमस्ति।
9. ऐसा नाटक विश्वसाहित्य में नहीं है → एवं विधं नाटकं विश्वसाहित्ये नास्ति।
10. ऐसा कहा जाता है कि काव्यों में नाटक रमणीय होता है और नाटकों में शाकुन्तल सर्वश्रेष्ठ है → इत्थं कथ्यते यत् काव्येषु नाटकं रम्यं, रम्या तत्र शकुन्तला (नाटकेषु शाकुन्तलं सर्वश्रेष्ठं)

30-08-2020

डॉ० निर्मल कुमार झा (स० प्राचार्यः)।
रा० उ० सं० महावि० सुरखसेना, पूर्णियाँ।